Shloka

(in devanagari)

नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ ३.१८ ॥

(in English)

naiva tasya kṛtēnārthō nākṛtēnēha kaścana |
na cāsya sarvabhūtēṣu kaścidarthavyapāśrayaḥ || 3.18 ||

Index Ref 3rd chapter,18 of 43

पदच्छेदः न,एव,तस्य,कृतेन,अर्थः,न,,अकृतेन,कश्चन ।
न,च,अस्य,सर्वभूतेषु,कश्चित्,अर्थव्यपाश्रयः ॥

अन्वयार्थः

(Prose order with meaning & introduction to the word)

इह	अस्मिन् लोके,अस्मिन् जगति	in this world
तस्य	आत्मरतस्य पुरुषस्य,	of that man
कृतेन	विहितेन (कर्मणा)	by action done
अर्थः	प्रयोजनम्,	object
न एव	नास्ति	surely not
अकृतेन	अविहितेन (कर्मणा)	by action not done
कश्चन	कोऽपि अर्थः	any (loss)
न	नास्ति,न विद्यते	not
अस्य	अस्य पुरुषस्य	of this man
सर्वभूतेषु	सर्वप्राणिषु	among all beings
कश्चित्	कश्चन्	any
अर्थव्यपाश्रयः	प्रयोजनसम्बन्धः अपि	and depending for any
च		object
न	नास्ति	not

अर्थः इह तस्य कृतेन (कर्मणा) अकृतेन कश्चन अर्थः नास्ति । अस्य च सर्वभूतेषु कश्चित् अर्थव्यपाश्रयः नास्ति ।

Meaning He has no object in this world (to gain) by doing (an action), nor (does he incur any loss) by non-performance of action - nor has he (need of) depending on any being for any object.

तात्पर्यं आत्मतृप्तस्य पुरुषस्य कृतेन कर्मणा अकृतेनापि कर्मणा प्रयोजनं नास्ति । प्राणिषु केनापि सह तस्य प्रयोजनस्य हेतोः सम्बन्धोऽपि नास्ति ।

व्याकरणम्

सन्धिः

नैव	- न + एव	वृद्धिसन्धिः
कृतेनार्थः	- कृतेन + अर्थः	सवर्णदीर्घसन्धिः
नाकृतेन	- न + अकृतेन	सवर्णदीर्घसन्धिः
अकृतेनेह	- अकृतेन + इह	गुणसन्धिः
चास्य	- च + अस्य	सवर्णदीर्घसन्धिः
कश्चिदर्थव्यपाश्रय	कश्चित् + अर्थव्यपाश्रयः	जश्त्वसन्धिः

समासः

अकृतेन	- न कृतम्, तेन	- नञ् तत्पुरुषः ।
अर्थव्यपाश्रयः	- अर्थाय व्यपाश्रयः	- चतुर्थीतत्पुरुषः ।
सर्वभूतेषु	- सर्वाणि च तानि भूतानि च, तेषु	- कर्मधारयः ।

कृदन्तः

कृतेन	- कृ + क्त (कर्मणि) ।